Roll No. ..................

# 921

## कक्षा 9 वीं परीक्षा, 2020-21

## [M-2703-A]

# SANSKRIT

# संस्कृत

[Total No. of Questions: 19] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 100]

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः।*

*(ii) प्रश्नानां समक्षे निर्धारिताः अङ्काः प्रदत्ताः।*

प्र.1 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत – (5×1=5)

(i) 'महेन्द्रः' इत्यस्मिन् पदे सन्धिः अस्ति–

(क) दीर्घ सन्धिः (ख) गुण सन्धिः

(ग) वृद्धि सन्धिः (घ) अयादि सन्धिः

(ii) 'निस् + छलः' इत्यस्य सन्धिः अस्ति–

(क) निस्छलः (ख) निशछलः

(ग) निष्छलः (घ) निश्छलः

(iii) विसर्ग–सन्धिः अस्ति–

(क) भानूदयः (ख) तल्लीनः

(ग) मनोहरः (घ) रमेशः

(iv) अधोलिखितेषु अव्ययपदम् अस्ति –

(क) अत्र (ख) सीता

(ग) अस्मान् (घ) महान्

(v) अधोलिखितेषु अव्ययपदं नास्ति –

(क) यत्र (ख) तत्र

(ग) कुत्र (घ) पुत्र



https://www.mpboardonline.com

प्र.2 अधोलिखितेषु उचितं विकल्पं चित्वा लिखत – (5X1=5)

(i) द्विगुः समासस्य उदाहरणम् अस्ति–

(क) यथाशक्तिः (ख) सप्तशती

(ग) शरणागतः (घ) धनहीनः

(ii) 'चन्द्रशेखरः' कस्य समासस्य उदाहरणं अस्ति–

(क) अव्ययीभाव समासस्य (ख) द्वन्द्व समासस्य

(ग) द्विगु समासस्य (घ) बहुव्रीहि समासस्य

(iii) 'घनश्यामः' इत्यस्य समास विग्रहं अस्ति–

(क) घन इव श्यामः (ख) घनश्यामः

(ग) घन च श्यामः (घ) घनाश्यामः

(iv) 'अधिकारः' इत्यस्मिन् पदे उपसर्गः अस्ति–

(क) अपि (ख) अति

(ग) अधि (घ) अध

(v) अधोलिखितेषु उपसर्गः नास्ति–

(क) बालकः (ख) प्र

(ग) वि (घ) परा

प्र.3 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) 'कमलम्' इत्यस्य पर्यायपदम् अस्ति–

(क) पंकजः (ख) मोहनः

(ग) अग्निः (घ) चन्द्रः

(ii) 'सूर्यः' इत्यस्य पदस्य पर्यायः नास्ति–

(क) रविः (ख) रामः

(ग) प्रभाकरः (घ) भास्करः

(iii) 'प्रकाशः' इत्यस्य विलोमपदम् अस्ति–

(क) अंधकारः (ख) मानवः

(ग) सत्कारः (घ) दानवः

(iv) 'उत्थानम्' इत्यस्य विलोमपदम् अस्ति–

(क) अनुजः (ख) पतनम्

(ग) याचकः (घ) प्रदानः

(v) 'इन्द्रः' इत्यस्य पर्यायपदम् अस्ति–

(क) सुरेन्द्रः (ख) मोहनः

(ग) सतीशः (घ) राकेशः



https://www.mpboardonline.com

उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) 'गच्छ' इत्यस्मिन् पदे पुरुषः अस्ति–

(क) प्रथमपुरुषः (ख) मध्यमपुरुषः

(ग) उत्तमपुरुषः (घ) तृतीयपुरुषः

(ii) 'याचतु' इत्यस्मिन् पदे वचनम् अस्ति–

(क) एकवचनम् (ख) द्विवचनम्

(ग) बहुवचनम् (घ) अववचनम्

(iii) 'अपश्यन्' इत्यस्मिन् पदे लकारः अस्ति–

(क) लोट्लकारः (ख) लृट्लकार

(ग) लङ् लकारः (घ) लट्लकारः

(iv) 'हसामि' इत्यस्मिन् पदे पुरुषः अस्ति–

(क) प्रथमपुरुषः (ख) मध्यमपुरुषः

(ग) उत्तमपुरुषः (घ) महापुरुषः

(v) 'गच्छानि' इत्यस्मिन् पदे वचनम् अस्ति–

(क) एकवचनम् (ख) द्विवचनम्

(ग) बहुवचनम् (घ) तृतीयवचनम्

Q.5 उचित विकल्पं चित्वा लिखत – (5X1=5)

(i) 'अजा' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(क) टाप् (ख) आप्

(ग) जाप् (घ) शाप्

(ii) 'अनीयर्' प्रत्ययस्य उदाहरणम् अस्ति–

(क) स्मरणीयम् (ख) पठितव्यं

(ग) दत्वा (घ) गतः

(iii) 'कथितः' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(क) क्त (ख) क्तवतु

(ग) क्त्वा (घ) ल्यप्

(iv) 'अज + टाप्' इत्यस्य पदम् भविष्यति–

(क) अजटा (ख) अजा

(ग) अजटाप् (घ) अटाप्

(v) 'परित्यज्य' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(क) शतृ (ख) ल्यप्

(ग) क्त्वा (घ) शानच्



https://www.mpboardonline.com

प्र.6 युग्म–मेलनं कुरुत– (4)

| (अ) | (ब) |
|---|---|
| (क) कवची | (1) अपतत् |
| (ख) विरथः | (2) वृद्धः |
| (ग) युवा | (3) रथविहीन |
| (घ) पपात | (4) कवचधारी |

प्र.7 रेखाङ्कितपदानि आधृत्य प्रश्न निर्माण कुरुत– (4)

(क) मोदकानि पूजानिमित्तानि रचितानि आसन्।

(ख) ग्रामे निर्धना स्त्री अवसत्।

(ग) बालिका निर्धनमातुः दुहिता आसीत्।

(घ) वृक्षाः फल न खादन्ति।

प्र.8 अधोलिखितेषु (केचिदद्वयोः) शब्दरूपाणि निर्देशानुसारं लिखत– (2)

(i) 'बालक' शब्दस्य प्रथमा विभक्तिः त्रिषुवचनेषु।

(ii) 'फल' शब्दस्य चतुर्थी विभक्तिः त्रिषुवचनेषु।

(iii) 'राजन्' शब्दस्य षष्ठी विभक्तिः त्रिषुवचनेषु।

प्र.9 'अस्मभ्यः' अथवा 'युष्माकम्' इत्यस्य पदस्य विभक्तिं वचनञ्च लिखत। (2)

प्र.10 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषित द्वयं लिखत। (4)

प्र.11 अधोलिखित प्रश्नेषु चतुर्णां प्रश्नानाम् संस्कृत भाषायाम् उत्तराणि एकपदेन लिखत– (4)

(क) संसारेऽस्मिन् कः अनश्वरः भवति?

(ख) कः तन्द्रालुः भवति?

(ग) तुला कैः भक्षिता आसीत्?

(घ) कः बाल्ये विद्यां न आधीतवान्?

(ङ) आयतलोचना का अस्ति?

(च) प्रासादः कीदृशः वर्तते?



https://www.mpboardonline.com

प्र.12 स्वस्य प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रम् संस्कृते लिखत। (4)

**अथवा**

स्वस्य मित्रस्य कृते एकं शुभकामना पत्रं संस्कृते लिखत।

प्र.13 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् लिखत– (5)

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम्। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति हिंसा भ्रष्टाचारादय। ये उपद्रवाः अस्मान् पीडयन्ति तेषां मूले अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जा भवेम।

(क) अस्य गद्यांशस्य शीर्षकं लिखत।

(ख) दुःखानां मूलकारणं किम्?

(ग) समाजे अनेके विकाराः कथं जायन्ते?

(घ) के उपद्रवाः अस्मान् पीडयन्ति?

(ङ) अज्ञानात् शब्दे का विभक्तिः?

प्र.14 प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत– (5)

(उत्सवः, अत्र, अवकाशः, निर्णयः, मा)

(क) अद्य..................................अस्ति।

(ख) ......................................आगच्छ।

(ग) कोलाहलं ................................कुरु।

(घ) सहसा ..................न करणीयः।

(ङ) मम ग्रहे ........................आसीत्।

प्र.15 पञ्च अशुद्ध वाक्यानां शुद्धिः करणीयः– (5)

(i) शिवं नमः।

(ii) छात्राः विद्यालये पठति।

(iii) कृषकाः ग्रामे गच्छन्ति।

(iv) वृक्षेण पत्राणि पतन्ति।

(v) पिता पुत्रस्य सह गच्छति।

(vi) त्वं पाठं पठति।

(vii) अहं फलं खादति।



https://www.mpboardonline.com

प्र.16 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृत–भाषायाम् लिखत – (3X2=6)

(क) कविः वाणीं किं कथयति?

(ख) गर्विता बालिका कीदृशं सोपानम् अयाचत्?

(ग) जन्तवः केन तुष्यन्ति?

(घ) कः वल्लभ–बृहन्नलयोः प्रश्नस्य उत्तरं न ददाति?

(ङ) अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः?

प्र.17 अधोलिखितेषु गद्यांश द्वयस्य प्रश्नानां उत्तराणि संस्कृत भाषायां लिखत – (2X5=10)

(अ) पुरा कस्मिश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्। सूर्यातपे तण्डुलान् खगेभ्यो रक्ष। किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्। नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। https://www.mpboardonline.com

(क) ग्रामे का न्यवसत्?

(ख) दुहिता कीदृशी आसीत्?

(ग) माता पुत्री किम् आदिशत्?

(घ) काकः कीदृशः आसीत्?

(ङ) स्थाल्यां तण्डुलान् कः निक्षिप्तवान्?

(ब) अस्ति हिमवान् नाम सर्वरत्न–भूमिः नगेन्द्र। तस्य सानोः उपरि विभाति कञ्चनपुरं नाम नगरम्। तत्र जीमूतकेतुः इति श्रीमान् विद्याधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। स राजा जीमूतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत्। सः जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्।

(क) हिमवानस्य सानोः उपरि कं नाम नगरं विभाति?

(ख) सार्वरत्नभूमि नगेन्द्रस्य नाम किम्?

(ग) जीमूतकेतोः पुत्रस्य नाम किम्?

(घ) जीमूतवाहनः कीदृशः आसीत्?

(ङ) जीमूतकेतुः कुत्र वसति स्म?



https://www.mpboardonline.com

(स) तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुला आसीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्ठिनम् अवदत्– "भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।" सोऽवदत्– "भोः! नास्ति सा, त्वदीया तुला मूषकैः भक्षिता" इति।

(क) तुला कीदृशी आसीत्?

(ख) तुला कैः भक्षिता आसीत्?

(ग) वणिकपुत्रः श्रेष्ठिनं किम् अवदत्?

(घ) श्रेष्ठिनः वणिकपुत्रं किम् अवदत्?

(ङ) वणिकपुत्रः कुत्र प्रस्थितः?

प्र.18 अधोलिखितेषु पद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – (2×5=10)

(अ) वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च। अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।

(क) किं यत्नेन संरक्षेद्?

(ख) कस्मात् क्षीणं मानवः हतः?

(ग) कं एति याति च?

(घ) वित्ततः क्षीणः नरः कीदृशः भवति?

(ङ) संरक्षेद् इत्यस्मिन् पदे का धातुः अस्ति?

(ब) पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः।

(क) नदीनां जलं काः न पिबन्ति?

(ख) वृक्षाः कानि स्वयं न खादन्ति?

(ग) वारिवाहाः किं न कुर्वन्ति?

(घ) वारियाहस्य कः अर्थः?

(ङ) सतां विभूतयः किमर्थं सन्ति?



https://www.mpboardonline.com

(स) निनादय नवीनामये वाणि! वीणाम्

मृदुं गाय गीतिं ललित–नीति–लीनाम्।

मधुर–मञ्जरी–पिञ्जरी– भूत–मालाः

वसन्ते लसन्तीह सरसा रसालाः

कलापाः ललित–कोकिला–काकलीनाम्।।

(क) कविः कां सम्बोधयति?

(ख) कविः वाणीं कां वादयितुं प्रार्थयति?

(ग) कविः कीदृशीं वीणां निनादयितुं प्रार्थयति?

(घ) सरसाः रसालाः कदा लसन्ति?

(ङ) 'लसन्ति' इत्यस्मिन् पदे कः लकारः?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृत –भाषायां निबन्धं लिखत– (10)

(क) मम पाठशाला

(ख) पुस्तकं

(ग) उद्यानम्

(घ) संस्कृत भाषायाः महत्त्वम्

---



https://www.mpboardonline.com